॥ ॐ ॥

॥ श्रीस्वाप्नवृन्दावनाख्यानगतश्रुतयः ॥

(ಪರಮಪೂಜ್ಯ ಶ್ರೀ1008 ಶ್ರೀವಿಶ್ವೋತ್ತಮತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರು
ಶ್ರೀಸೋದಾಕ್ಷೇತ್ರದಲ್ಲಿ ಪಂಚವೃಂದಾವನದ ಮುಂಭಾಗ ನಿರ್ಮಾಣಮಾಡಿಸಿದ
''ಶ್ರೀಆಖ್ಯಾನಮಂದಿರ''ದಲ್ಲಿ ಅವರ ಅಜ್ಞಾನುಸಾರವಾಗಿ ಈ ಶ್ರುತಿಪ್ರಮಾಣಗಳು
ಶಿಲಾಲೇಖಗೈಯಲ್ಪಟ್ಟು ಅವರಿಂದಲೇ ಶ್ರೀಗುರುರಾಜರಿಗೆ ಸಮರ್ಪಿತವಾಗಿವೆ.)

१. "उक्थमुक्थेति यं विदुः" इति वृन्दावनाख्यानम् (१/६७) --

तथा हि ऋक् --७/२६/२

"उ॒क्थउ॑क्थे॒ सोम॒ इन्द्रं॑ ममाद नी॒थेनी॑थे म॒घवा॑नं सु॒तासः॑ ।
यदीं॑ स॒बाधः॑ पि॒तरं॒ न पु॒त्राः स॑मा॒नद॑क्षा॒ अव॑से हव॑न्ते ॥" इति ।

२. "दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः" इति वृन्दावनाख्यानम् (१/११०) --

"अ॒भि न॒ इळा॑ यू॒थस्य॑ मा॒ता स्मन्न॒दीभि॑रु॒र्वशी॑ वा गृणातु ।
उ॒र्वशी॑ वा बृहद्दि॒वा गृ॑णा॒नाऽभ्यू॑र्ण्वा॒ना प्र॑भृ॒थस्या॒योः ॥" इति ।

३. "न ग्रहोऽथ बलिग्रहः" इति वृन्दावनाख्यानम् (३/४) --

तथा हि तैत्तिरीयोप॑निषत् (१/१२) --

"चत॑स्रश्चतस्रो॒ व्याहृ॑तयः । ता यो वेद॑ । स वे॑द॒ ब्रह्म॑ । सर्वे॑ऽस्मै दे॒वा
ब॒लिमाव॑हन्ति ॥" इति ।

४. "यो मां ग्रहं विजानाति तस्य पुण्यं हराम्यहम्" इति वृन्दावनाख्यानम् (३/६)

तच्चोक्तं बृहत्सं॑हितायाम् --

"महारवश्रुतिश्चैनं ब्रह्मा ज्ञात्वेति वक्ति हि ।
स्वोपासकानां भक्तानां लातव्योऽभीष्टदायकः ॥" इति ।

"ब्रह्मा ज्ञात्वेति लोकप्रवृत्तिं प्रवर्ततां को नु मोक्षं ददाति ।
अतो ब्रह्मोपासते साधु धीरा नाहम्भावस्तेषु रुद्राधिवासः ॥" इति ।

५. "यो मामेवं विजानाति ऋजुस्थं पुण्यकृन्नरः" इति वृन्दावनाख्यानम् (३/७) --

"सञ्जर्भुराणसूक्तेन लातव्यो हि सुरेश्वरः ।
गीयते ऋजुगाथोऽसौ वादिराजो महान् यतिः ॥" इति ।

"सञ्जर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।
धारावाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥" इति।

६. "स्वाराज्यपतिना सम्यक् स्वर्चितश्च स्वराडहम्" इति वृन्दावनाख्यानम् (३/४०)

तथाहि ऋक् - (१/६१/९)
"अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥" इति ।

७. "कुमारोऽयमिति ब्रुवन्" इति वृन्दावनाख्यानम् (४/१४) --

"प्र मातुः प्रतरं गुह्यमिच्छन् कुमारो न वीरुधः सर्पदुर्वीः ।
ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः ॥" इति ।

८. "अहमारुहमाहार्यनीहारमिव लाघवात्" इति वृन्दावनाख्यानम् (४/३६) --

तथा हि ऋक् (९/८३/५) --

"हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् ।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥" इति ।

९) "मारुतो मारुतस्त्वं हि" इति वृन्दावनाख्यानम्(४/७४)--

तच्चोक्तं व्योमसंहितायाम् -

"आ मध्व इति सूक्तेन लातव्यो हि सुरेश्वरः।
गीयते वादिराजेन्द्रो हयग्रीवप्रसादभाक् ॥" इति ।

तथा हि ऋक् (१०/२९/७) -

"आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः ।
स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥" इति ।

१०) "भुवि को वर्तते युवन् ।" इति वृन्दावनाख्यानम् (४/८९) --

तथाहि ऐतरेयब्राह्मणम् -- (२/२)
"प्राणो वै युवा सुवासाः॥" इति ।

११) "त्रिवाचापि मया चोक्तम् ।" इति वृन्दावनाख्यानम् (५/४)--

तथा हि ऋक् (९/९७/३४) --

"तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः॥" इति॥

१२) "शिंशुमारं समासाद्य कंसमारेण चादृतः" इति वृन्दावनाख्यानम् (५/५१)--

तथाहि ताण्ड्यमहाब्राह्मणम् (८/६/८) --

"एतद्ध स्म वा आह कूशाम्बः स्वायवो ब्रह्मा लातव्यः कश्स्विदद्य
शिंशुमारी यज्ञपथेऽप्यस्तारिष्यति ॥" इति ।

१३) "अन्नकामाय चरते कृशायेति श्रुतौ सुत ।" इति वृन्दावनाख्यानम् (५/६९)

तथाहि ऋक् - (१०/११७/३) --

“स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ॥” इति ।

१४) “कविः स्यां त्वन्मुखे सदा” इति वृन्दावनाख्यानम् (६/७३) -

तथाहि ऋक् (१/१२/७) --

“कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ॥” इति ।

१५) “अघमर्षणतो दोषं शोषयामि तदप्यहम् ॥” इति वृन्दावनाख्यानम् (७/१८)

“यश्चाप्सु वरुणः स पुनात्वघमर्षणः ॥” इति ।

१६) “ह्युप ते गा इवाकरम् ।” इति वृन्दावनाख्यानम् (७/९६) --

“उप ते गा इवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥”
इति ।

१७) “नाथो ह्यात्मानमेवासौ हयग्रीवो ददौ मुदा ।” इति वृन्दावनाख्यानम् (९/४)

तथा हि ऋक् (१०/७१/४) --

“उतो त्वस्मै तन्वं १ वि सस्रे जायेव पत्य उशती सुवासाः ।” इति ।

१८) “पावकवज्ज्वलन्” इति वृन्दावनाख्यानम् (९/३३)--

तथा हि ऋङ्मन्त्रौ(९/२४/६,७)--

“पवस्व वृत्रहन्तोमोक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ॥
शुचिः पावक उच्यते सोमः सुतस्य मध्वः । देवावीरघशंसहा ॥” इति ।

१९) “करोम्यहरहः कर्म हंसो हंसरहस्यकृत्” इति वृन्दावनाख्यानम् (९/५५) --

तथाहि ऋङ्मन्त्रौ - (१/६५/४,५) --

"जामिः सिन्धूनां, भ्रातेव स्वस्रामिभ्यान्न राजा, वनान्यत्ति ।
यद् वातजूतो, वना व्यस्थादग्निर्हं दाति, रोमा पृथिव्याः ॥४॥

श्वसित्यप्सु, हंसो न सीदन् क्रत्वा चेतिष्ठो, विशामुषर्भुत् ।
सोमो न वेधा, ।ऋतप्रजातः पशुर्न शिश्वा, विभुर्दूरेभाः ॥५॥" इति ।

२०) "सम्राडिव प्रय" इति वृन्दावनाख्यानम् (९/८९)

तथाहि गोपथब्राह्मणम् (१/४/१७) --

"स यदाह सम्राडसीति सोमं वा यदाहैष ह वै हिरण्यवर्णो वायुर्भूत्वाऽन्तरिक्षलोके सम्राजति यद् यत् सम्राजति तस्मात् सम्राट् तत् सम्राजस्य सम्राड्वम् ॥ इति ।

२१) "महीजश्चामहीजश्च सहोषतुरहोरहः" इति वृन्दावनाख्यानम् (१०/२१) --

तथाहि बृहत्संहितायां चतुर्मुखवचनम् -

"सितासितेतिसूक्तेन वादिराजो यतीश्वरः।
गीयते, स्वं च भजतामानन्दम् इतरं तथा ।
द्वेषिणां दायको वाजिवक्त्रधारी महान् यति ॥" इति ।

तथा हि ऋग्वेदखिलम् (१०/७५/५ मन्त्रस्यानन्तरम्)--

सितासिते सरिते सङ्गथे तत्राप्लुतासो दिवमुत्पतन्ति ।
ये वै तन्वं १ वि सृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते ॥" इति ।

22) "रुद्रो वाऽभद्रहीनोऽसि सुपर्णो वाऽर्णवातरः ।
शेषो वा दोषहीनोऽसि वायुर्वाऽपायदूरगः ॥
इन्द्रो वा सान्द्रसन्तोषी चन्द्रो वाऽमन्दतोषकः ।

कामो वा त्वं च रामाणां मोहनं रूपमाश्रितः ॥
सूर्यो वा शौर्यसम्पन्नो ऋषिर्वाऽपर्षवाचकः ।
धनदो धनिनां श्रेष्ठो महाधनविभूषणः ॥
वरुणः करुणासक्तस्त्वं कविः कोविदेश्वरः ।

इति वृन्दावनाख्यानम् -- (१०/४५-४८)

तथाहि ऋक् -
"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥" इति ।

२३) "मृत्तिका नाशयत्येव" इति वृन्दावनाख्यानम् (१०/७१) --

तथा हि तन्त्रभागवतम् -
"जीवोत्तमो हयग्रीवमृत्तिकाभूषितालिकः ।
लातव्यो वादिराजोऽसौ भाविमध्वो महामतिः ॥" इति ।

तथा हि ऐतरेयब्राह्मणम् (३/३४/२) --
(अग्ने) "मृत्तिका ते रोहिता ।" इति ।

२४) "सेवस्व मम पादाब्जं नित्यं भारतकीर्तनैः" इति वृन्दावनाख्यानम् (१०/७७) -

तथा हि श्रीनारायणोदितपञ्चरात्रम् -
"कमठश्रुतिर्मुख्यवृत्त्या यो जीववदिति वक्ति हि ।
मोक्षदं वादिराजं तं दशप्रमतिशब्दितम् ॥" इति ।

तथा हि श्रीमद्भागवततात्पर्यनिर्णयोदाहृतकमठश्रुतिः (१०/९४/२०) -

"यो जीववद् योनिषु भात्यनन्तो मूढैस्तमोगैर्भरताधिगम्यः ।
निचाय्य तं शाश्वतमात्मसंस्थं तदिच्छवो त्मन्यदधुर्महान्तम् ।" इति ।

२५) "मां च श्रृङ्गाररूपिणम्" इति वृन्दावनाख्यानम् (१३/६५) --

तथा हि ऋक् (१/१४०/६)--

भूषन् न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न श्रृङ्गा दविधाव दुर्गृभिः ॥ इति ।

तथा हि न्यायरत्नावली (२/२३) –

"सुन्दोपसुन्दौ हन्तुं प्राग्ब्रह्मा चक्रे तिलोत्तमाम् ।
भाविब्रह्मा त्विमौ हन्तुं चक्रे युक्तितिलोत्तमाम् ॥" इति ।

२६) "सोमाश्रयाद्यथा रुद्रोऽप्युमाकान्तो गतव्यथः" इति वृन्दावनाख्यानम् (१४/८२) --

तथा हि बृहत्संहितायां चतुर्मुखवचनम् -

"देवस्यास्येति वचनं रुद्राद्यैश्वर्यकारणम् ।
ब्रवीति वादिराजं तं संशयं त्यजतामराः ॥" इति ।

"अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥" इति ॥

२७) "पञ्चास्यवाक्यसन्दिष्टं पुराणं पञ्चलक्षणम्" इति वृन्दावनाख्यानम् (१६/२५)

तथाहि ऋक् - (९/८९/३)

"सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥" इति।

२८) "नित्यं ब्राह्मणसम्बन्धि सत्यं वाक्यं मयोदितम् ॥" इति वृन्दावनाख्यानम् (१६/३६)

तथा हि गोपथब्राह्मणम् (१/१/२५) –

"तस्माद् ब्राह्मणवचनमादर्तव्यम्, यथा लातव्यो गोत्रो ब्रह्मणः पुत्रः, गायत्रं छन्दः, शुक्लो वर्णः, पुंसो वत्सो, रुद्रो देवता, ओङ्कारो वेदानाम् ॥" इति ।

२९) "मारिषं मां विजानथ ।" इति वृन्दावनाख्यानम् (१६/९४)

तथा हि शतपथब्राह्मणम् (८/७/३/१०) --

"तदसावादित्य इमान् लोकान् सूत्रे समावयते तद् यत् तत् सूत्रं स वायुः ॥" इति । "प्राणो वै मारिषः" इति च श्रुतिः ।

३०) "अंहो मुग्वचनं मम" इति वृन्दावनाख्यानम् (१७/९६)--

तथा हि ऋक् (२/२३/५) -

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद् ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥

३१) "अस्तु श्रौषडिति प्रोक्ता" इति वृन्दावनाख्यानम् (१८/१४)--

तथा हि ऋक् (१/१३९/१) --
"अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु
तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वति नाभा सन्धायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥" इति ।

३२) "बह्वी समा इति श्रुत्या चांहोनाशं करिष्यतु ।" इति वृन्दावनाख्यानम् (१९/४७) --

"बह्वीः समा अकरमन्तरस्मिन्निन्द्रं वृणानः पितरं जहामि ।
अग्निः सोमो वरुणस्ते च्यवन्ते पर्यावर्द्राष्ट्रं तदवाम्यायन् ॥" इति ।

३३) "वक्ष्ये वक्ष्ये स्वप्नेऽथवा स्वप्नोऽप्यहं त्विह दिवाऽप्यहो ।" इति वृन्दावनाख्यानम् (२०/६०)

तथा हि शतपथब्राह्मणम् (१०/५/२/१४) -

" एष उ एव प्राणः । एष हीमाः सर्वाः प्रजाः प्रणयति, तस्यैते प्राणाः स्वाः

स यदा स्वपित्यथैनमेते प्राणाः स्वा अपियन्ति तस्मात् स्वाप्ययः, स्वाप्ययो ह वै तᳪस्वप्न इत्याचक्षते परोऽक्षम् ॥" इति ।

३४) "तादृशं शङ्खमादाय।" इति वृन्दावनाख्यानम् (२०/६७) --

तथा हि ऋङ्मन्त्रौ (१/१५४/५, ९/६६/२०) --

"तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥" इति;

"अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तमीमहे महागयम् ॥" इति च ।

३५) "ब्राह्मणे स्वप्नमद्राक्षीत् कर्णे यक्षी च कश्चन ।" इति वृन्दावनाख्यानम् (२१/४४)--

तथा हि ऋङ्मन्त्रौ (७/८८/६, १०/८६/४)--

"य आपिर्नित्यो वरुण प्रियः सन त्वामागांसि कृणवत् सखा ते ।
मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ॥" इति ।

"यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।
श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥" इति च ।

३६) "मन्म मन्म वयं सर्वेऽप्येवमेव न संशयः" इति वृन्दावनाख्यानम् (२१/६६)

तथा हि ऋक् (१/१२९/६) --

"प्र तद् वोचेयं भव्यायेन्दवे हव्यो न य
इषवान् मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम्
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥" इति ।

॥श्रीमद्वादिराजगुर्वन्तर्गतअर्ववदनप्रसीदतु॥